# YakSha's Questions Yaxaprashna

# યક્ષપ્રશ્નાઃ

## Document Information

Text title : yaxaprashnaaH

File name : yaxa.itx

Category : major_works, vyAsa

Location : doc_z_misc_major_works

Author : Vyasa (author of Mahabharata)

Transliterated by : Sunder Hattangadi

Proofread by : Sunder Hattangadi, Priyamvada Nambrath priyamvada_none at hotmail.com

Latest update : July 31, 1998, April 26, 2020

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

March 24, 2024

*sanskritdocuments.org*

# યક્ષપ્રશ્નાઃ

YakSha's Questions

અધ્યાયઃ ૩૧૩

વૈશંપાયન ઉવાચ ।

સ દદર્શ હતાન્ભ્રાતૄઁલ્લોકપાલાનિવ ચ્યુતાન્ ।
યુગાન્તે સમનુપ્રાપ્તે શક્રપ્રતિમગૌરવાન્ ॥ ૧॥

વિનિકીર્ણધનુર્બાણં દૃષ્ટ્વા નિહતમર્જુનમ્ ।
ભીમસેનં યમૌ ચોભૌ નિર્વિચેષ્ટાન્ગતાયુષઃ ॥ ૨॥

સ દીર્ઘમુષ્ણં નિઃશ્વસ્ય શોકબાષ્પપરિપ્લુતઃ ।
તાન્દૃષ્ટ્વા પતિતાન્ભ્રાતૄન્સર્વાંશ્ચિન્તાસમન્વિતઃ ॥ ૩॥

ધર્મપુત્રો મહાબાહુર્વિલલાપ સુવિસ્તરમ્ ।
નનુ ત્વયા મહાબાહો પ્રતિજ્ઞાતં વૃકોદર ॥ ૪॥

સુયોધનસ્ય ભેત્સ્યામિ ગદયા સક્થિનિ રણે ।
વ્યર્થં તદદ્ય મે સર્વં ત્વયિ નીરે નિપાતિતે ॥ ૫॥

મહાત્મનિ મહાબાહો કુરૂણાં કીર્તિવર્ધને ।
મનુષ્યસંભવા વાચો વિધર્મિણ્યઃ પ્રતિ શ્રુતાઃ ॥ ૬॥

ભવતાં દિવ્યવાચસ્તુ તા ભવન્તુ કથં મૃષા ।
દેવાશ્ચાપિ યદાઽવોચન્સૂતકે ત્વાં ધનઞ્જય ॥ ૭॥

સહસ્રાક્ષાદનવરઃ કુન્તિપુત્રસ્તવેતિ વૈ ।
ઉત્તરે પારિયાત્રે ચ જગુર્ભૂતાનિ સર્વશઃ ॥ ૮॥

વિપ્રનષ્ટાં શ્રિયં ચૈષામાહર્તા પુનરઞ્જસા ।
નાસ્ય જેતા રણે કશ્ચિદજેતા નૈષ કસ્યચિત્ ॥ ૯॥

સોઽયં મૃત્યુવશં યાતઃ કથં જિષ્ણુર્મહાબલઃ ।

અયં મમાંશાં સંહત્ય શેતે ભૂમૌ ધનઞ્જયઃ ॥ ૧૦॥

આશ્રિત્ય યં વયં નાથં દુઃખાન્યેતાનિ સેહિમ ।
રણે પ્રમત્તૌ વીરૌ ચ સદા શત્રુનિબર્હણૌ ॥ ૧૧॥ રણે પ્રગલ્ભૌ

કથં રિપુવશં યાતૌ કુન્તીપુત્રૌ મહાબલૌ ।
યૌ સર્વાસ્ત્રાપ્રતિહતૌ ભીમસેનધનઞ્જયૌ ॥ ૧૨॥

અશ્મસારમયં નૂનં હૃદયં મમ દુર્હૃદઃ ।
યમૌ યદેતૌ દૃષ્ટ્વાઽદ્ય પતિતૌ નાવદીર્યતે ॥ ૧૩॥

શાસ્ત્રજ્ઞા દેશકાલજ્ઞાસ્તપોયુક્તાઃ ક્રિયાન્વિતાઃ ।
અકૃત્વા સદૃશં કર્મ કિં શેધ્વં પુરુષર્ષભાઃ ॥ ૧૪॥

અવિક્ષતશરીરાશ્ચાપ્યપ્રમૃષ્ટશરાસનાઃ ।
અસંજ્ઞા ભુવિ સઙ્ગમ્ય કિં શેધ્વમપરાજિતાઃ ॥ ૧૫॥

સાનૂનિવાદ્રેઃ સંસુપ્તાન્ દૃષ્ટ્વા ભ્રાતૄન્મહામતિઃ ।
સુખં પ્રસુપ્તાં પ્રસ્વિન્નઃ ખિન્નઃ કષ્ટાં દશાં ગતઃ ॥ ૧૬॥

એવમેવેદમિત્યુક્ત્વા ધર્માત્મા સ નરેશ્વરઃ ।
શોકસાગર મધ્યસ્થો દધ્યૌ કારણમાકુલઃ ॥ ૧૭॥

ઇતિકર્તવ્યતાં ચેતિ દેશકાલવિભાગવિત્ ।
નાભિપેદે મહાબાહુશ્ચિન્તયાનો મહામતિઃ ॥ ૧૮॥

અથ સંસ્તભ્ય ધર્માત્મા તદાઽઽત્માનં તપઃ સુતઃ ।
એવં વિલપ્ય બહુધા ધર્મપુત્રો યુધિષ્ઠિરઃ ॥ ૧૯॥

બુદ્ધ્યા વિચિન્તયામાસ વીરાઃ કેન નિપાતિતાઃ ॥ ૨૦॥

નૈષાં શસ્ત્રપ્રહારોઽસ્તિ પદં નેહાસ્તિ કસ્યચિત્ ।
ભૂતં મહદિદં મન્યે ભ્રાતરો યેન મે હતાઃ ॥ ૨૧॥

એકાગ્રં ચિન્તયિષ્યામિ પીત્વા વેત્સ્યામિ વા જલમ્ ।
સ્યાત્તુ દુર્યોધનેનેદમુપાંશુ વિહિતં કૃતમ્ ॥ ૨૨॥

ગાન્ધારરાજરચિતં સતતં જિહ્મબુદ્ધિના ।
યસ્ય કાર્યમકાર્યં વા સમમેવ ભવત્યુત ॥ ૨૩॥

કસ્તસ્ય વિશ્વસેદ્વીરો દુષ્કૃતેરકૃતાત્મનઃ ।

અથવા પુરુષૈર્ગૂઢૈઃ પ્રયોગોઽયં દુરાત્મનઃ ॥ ૨૪॥

ભવેદિતિ મહાબુદ્ધિર્બહુધા તદચિન્તયત્ ।
તસ્યાસીન્ન વિષેણેદમુદકં દૂષિતં યથા ॥ ૨૫॥

મૃતાનામપિ ચૈતેષાં વિકૃતં નૈવ જાયતે ।
મુખવર્ણાઃ પ્રસન્ના મે ભ્રાતૃણામિત્યચિન્તયત્ ॥ ૨૬॥

એકૈકશશ્ચૌઘબલાનિમાન્પુરુષસત્તમાન્ ।
કોઽન્યઃ પ્રતિસમાસેત કાલાન્તકયમાદૃતે ॥ ૨૭॥

એતેન વ્યવસાયેન તત્તોયં વ્યવગાઢવાન્ ।
ગાહમાનશ્ચ તત્તોયમન્તરિક્ષાત્સ શુશ્રુવે ॥ ૨૮॥

યક્ષ ઉવાચ ।
અહં બકઃ શૈવલમત્સ્યભક્ષો
નીતા મયા પ્રેતવશં તવાનુજાઃ ।
ત્વં પઞ્ચમો ભવિતા રાજપુત્ર
ન ચેત્પ્રશ્નાન્પૃચ્છતો વ્યાકરોષિ ॥ ૨૯॥

મા તાત સાહસં કાર્ષીર્મમ પૂર્વપરિગ્રહઃ ।
પ્રશ્નાનુક્ત્વા તુ કૌન્તેય તતઃ પિબ હરસ્વ ચ ॥ ૩૦॥

યુધિષ્ઠિર ઉવાચ ।
રુદ્રાણાં વા વસૂનાં વા મરુતાં વા પ્રધાનભાક્ ।
પૃચ્છામિ કો ભવાન્દેવો નૈતચ્છકુનિના કૃતમ્ ॥ ૩૧॥

હિમવાન્પારિયાત્રશ્ચ વિન્ધ્યો મલય એવ ચ ।
ચત્વારઃ પર્વતાઃ કેન પાતિતા ભૂરિતેજસઃ ॥ ૩૨॥

અતીવ તે મહત્કર્મ કૃતં ચ બલિનાં વર ।
યાન્ન દેવા ન ગન્ધર્વા નાસુરાશ્ચ રાક્ષસાઃ ॥ ૩૩॥

વિષહેરન્મહાયુદ્ધે કૃતં તે તન્મહાદ્ભુતમ્ ।
ન તે જાનામિ યત્કાર્યં નાભિજાનામિ કાઙ્ક્ષિતમ્ ॥ ૩૪॥

કૌતૂહલં મહજ્જાતં સાધ્વસં ચાગતં મમ ।
યેનાસ્મ્યુદ્વિગ્નહૃદયઃ સમુત્પન્નશિરોજ્વરઃ ॥ ૩૫॥

પૃચ્છામિ ભગવંસ્તસ્માત્કો ભવાનિહ તિષ્ઠતિ ।

યક્ષ ઉવાચ ।
યક્ષોઽહમસ્મિ ભદ્રં તે નાસ્મિ પક્ષી જલેચરઃ ॥ ૩૬॥

મયૈતે નિહતાઃ સર્વે ભ્રાતરસ્તે મહૌજસઃ ।
વૈશંપાયન ઉવાચ ।
તતસ્તામશિવાં શ્રુત્વા વાચં સ પરુષાક્ષરામ્ ॥ ૩૭॥

યક્ષસ્ય બ્રુવતો રાજન્નુપક્રમ્ય તદા સ્થિતઃ ।
વિરૂપાક્ષં મહાકાયં યક્ષં તાલસમુચ્છ્રયમ્ ॥ ૩૮॥

જ્વલનાર્કપ્રતીકાશમધૃષ્યં પર્વતોપમમ્ ।
વૃક્ષમાશ્રિત્ય તિષ્ઠન્તં દદર્શ ભરતર્ષભઃ ॥ ૩૯॥

મેઘગંભીરનાદેન તર્જયન્તં મહાસ્વનમ્ ।
યક્ષ ઉવાચ ।
ઇમે તે ભ્રાતરો રાજન્વાર્યમાણા મયાઽસકૃત્ ॥૪૦॥

બલાત્તોયં જિહીર્ષન્તસ્તતો વૈ મૃદિતા મયા ।
ન પેયમુદકં રાજન્પ્રાણાનિહ પરીપ્સતા ॥ ૪૧॥

પાર્થ મા સાહસં કાર્ષીર્મમ પૂર્વપરિગ્રહઃ ।
પ્રશ્નાનુક્ત્વા તુ કૌન્તેય તતઃ પિબ હરસ્વ ચ ॥ ૪૨॥

યુધિષ્ઠિર ઉવાચ ।
ન ચાહ્ં કામયે યક્ષ તવ પૂર્વપરિગ્રહમ્ ।
કામં નૈતત્પ્રશંસન્તિ સન્તો હિ પુરુષાઃ સદા ॥ ૪૩॥

યદાત્મના સ્વમાત્માનં પ્રશંસે પુરુષર્ષભ ।
યથા પ્રજ્ઞં તુ તે પ્રશ્નાન્પ્રતિવક્ષ્યામિ પૃચ્છ મામ્ ॥ ૪૪॥

યક્ષ ઉવાચ ।
કિં સ્વિદાદિત્યમુન્નયતિ કે ચ તસ્યાભિતશ્ચરાઃ ।
કશ્ચૈનમસ્તં નયતિ કસ્મિંશ્ચ પ્રતિતિષ્ઠતિ ॥ ૪૫॥

યુધિષ્ઠિર ઉવાચ ।
બ્રહ્માદિત્યમુન્નયતિ દેવાસ્તસ્યાભિતશ્ચરાઃ ।
ધર્મશ્ચાસ્તં નયતિ ચ સત્યે ચ પ્રતિતિષ્ઠતિ ॥ ૪૬॥

યક્ષ ઉવાચ ।

કેનસ્વિચ્છ્રોત્રિયો ભવતિ કેનસ્વિદ્વિન્દતે મહત્ ।
કેનસ્વિદ્દ્વિતીયવાન્ભવતિ રાજન્કેન ચ બુદ્ધિમાન્ ॥ ૪૭॥

યુધિષ્ઠિર ઉવાચ ।
શ્રુતેન શ્રોત્રિયો ભવતિ તપસા વિન્દતે મહત્ ।
ધૃત્યા દ્વિતીયવાન્ભવતિ બુદ્ધિમાન્વૃદ્ધસેવયા ॥ ૪૮॥

યક્ષ ઉવાચ ।
કિં બ્રાહ્મણાનાં દેવત્વં કશ્ચ ધર્મઃ સતામિવ ।
કશ્ચૈષાં માનુષો ભાવઃ કિમેષામસતામિવ ॥ ૪૯॥

યુધિષ્ઠિર ઉવાચ ।
સ્વાધ્યાય એષાં દેવત્વં તપ એષાં સતામિવ ।
મરણં માનુષો ભાવઃ પરિવાદોઽસતામિવ ॥ ૫૦॥

યક્ષ ઉવાચ ।
કિં ક્ષત્રિયાણાં દેવત્વં કશ્ચ ધર્મઃ સતામિવ ।
કશ્ચૈષાં માનુષો ભાવઃ કિમેષામસતામિવ ॥ ૫૧॥

યુધિષ્ઠિર ઉવચ ।
ઇષ્વસ્ત્રમેષાં દેવત્વં યજ્ઞ એષાં સતામિવ ।
ભયં વૈ માનુષો ભાવઃ પરિત્યાગોઽસતામિવ ॥ ૫૨॥

યક્ષ ઉવાચ ।
કિમેકં યજ્ઞિયં સામ કિમેકં યજ્ઞિયં યજુઃ ।
કા ચૈષાં વૃણુતે યજ્ઞં કાં યજ્ઞો નાતિવર્તતે ॥ ૫૩॥

યુધિષ્ઠિર ઉવાચ ।
પ્રાણો વૈ યજ્ઞિયં સામ મનો વૈ યજ્ઞિયં યજુઃ ।
ઋગેકા વૃણુતે યજ્ઞં તાં યજ્ઞો નાતિવર્તતે ॥ ૫૪॥

યક્ષ ઉવાચ ।
કિંસ્વિદાવપતાં શ્રેષ્ઠં કિંસ્વિન્નિવપતાં વરમ્ ।
કિંસ્વિત્પ્રતિષ્ઠમાનાનાં કિંસ્વિત્પ્રસવતાં વરમ્ ॥ ૫૫॥

યુધિષ્ઠિર ઉવાચ ।
વર્ષમાવતતાં શ્રેષ્ઠં બીજં નિવપતાં વરમ્ ।
ગાવઃ પ્રતિષ્ઠમાનાનાં પુત્રઃ પ્રસવતાં વરઃ ॥ ૫૬॥

યક્ષ ઉવાચ ।
ઇન્દ્રિયાર્થાનનુભવન્બુદ્ધિમાઁલ્લોકપૂજિતઃ ।
સંમતઃ સર્વભૂતાનામુચ્છ્વસન્કો ન જીવતિ ॥ ૫૭॥

યુધિષ્ઠિર ઉવાચ ।
દેવતાતિથિભૃત્યાનાં પિતૃણામાત્મનશ્ચ યઃ ।
ન નિર્વપતિ પઞ્ચાનામુચ્છ્વસન્ન સ જીવતિ ॥ ૫૮॥

યક્ષ ઉવાચ ।
કિંસ્વિદ્ગુરુતરં ભૂમેઃ કિંસ્વિદુચ્ચતરં ચ ખાત્ ।
કિંસ્વિચ્છીઘ્રતરં વાયોઃ કિંસ્વિદ્બહુતરં તૃણાત્ ॥ ૫૯॥

યુધિષ્ઠિર ઉવાચ ।
માતા ગુરુતરા ભૂમેઃ ખાત્ પિતોચ્ચતરસ્તથા ।
મનઃ  શીઘ્રતરં વાતાચ્ચિન્તા બહુતરી તૃણાત્ ॥ ૬૦॥

યક્ષ ઉવાચ ।
કિંસ્વિત્સુપ્તં ન નિમિષતિ કિંસ્વિજ્જાતં ન ચોપતિ ।
કસ્યસ્વિદ્ધૃદયં નાસ્તિ કિંસ્વિદ્વેગેન વર્ધતે ॥ ૬૧॥

યુધિષ્ઠિર ઉવાચ ।
મત્સ્યઃ સુપ્તો ન નિમિષત્યણ્ડં જાતં ન ચોપતિ ।
અશ્મનો હૃદયં નાસ્તિ નદી વેગેન વર્ધતે ॥ ૬૨॥

યક્ષ ઉવાચ ।
કિંસ્વિત્પ્રવસતો મિત્રં કિંસ્વિન્મિત્રં ગૃહે સતઃ ।
આતુરસ્ય ચ કિં મિત્રં કિંસ્વિન્મિત્રં મરિષ્યતઃ ॥ ૬૩॥

યુધિષ્ઠિર ઉવાચ ।
સાર્થઃ પ્રવસતો મિત્રં ભાર્યા મિત્રં ગૃહે સતઃ ।
આતુરસ્ય ભિષઙ્મિત્રં દાનં મિત્રં મરિષ્યતઃ ॥ ૬૪॥

યક્ષ ઉવાચ ।
કોઽતિથિઃ સર્વભૂતાનાં કિંસ્વિદ્ધર્મં સનાતનમ્ ।
અમૃતં કિંસ્વિદ્રાજેન્દ્ર કિંસ્વિત્ સર્વમિદં જગત્ ॥ ૬૫॥

યુધિષ્ઠિર ઉવાચ ।
અતિથિઃ સર્વભૂતાનામગ્નિઃ સોમો ગવામૃતમ્ ।

સનાતનોઽમૃતો ધર્મો વાયુઃ સર્વમિદં જગત્ ॥ ૬૬॥

યક્ષ ઉવાચ ।
કિંસ્વિદેકો વિચરતે જાતઃ કો જાયતે પુનઃ ।
કિંસ્વિદ્ધિમસ્ય ભૈષજ્યં કિંસ્વિદાવપનં મહત્ ॥ ૬૭॥

યુધિષ્ઠિર ઉવાચ ।
સૂર્ય એકો વિચરતે ચન્દ્રમા જાયતે પુનઃ ।
અગ્નિર્હિમસ્ય ભૈષજ્યં ભૂમિરાપવનં મહત્ ॥ ૬૮॥

યક્ષ ઉવાચ ।
કિંસ્વિદેકપદં ધર્મ્યં કિંસ્વિદેકપદં યશઃ ।
કિંસ્વિદેકપદં સ્વર્ગ્યં કિંસ્વિદેકપદં સુખમ્ ॥ ૬૯॥

યુધિષ્ઠિર ઉવાચ ।
દાક્ષ્યમેકપદં ધર્મ્યં દાનમેકપદં યશઃ ।
સત્યમેકપદં સ્વર્ગ્યં શીલમેકપદં સુખમ્ ॥ ૭૦॥

યક્ષ ઉવાચ ।
કિંસ્વિદાત્મા મનુષ્યસ્ય કિંસ્વિદ્દૈવકૃતઃ સખા ।
ઉપજીવનં કિંસ્વિદસ્ય કિંસ્વિદસ્ય પરાયણમ્ ॥ ૭૧॥

યુધિષ્ઠિર ઉવાચ ।
પુત્ર આત્મા મનુષ્યસ્ય ભાર્યા દૈવકૃતઃ સખા ।
ઉપજીવનં ચ પર્જન્યો દાનમસ્ય પરાયણમ્ ॥ ૭૨॥

યક્ષ ઉવાચ ।
ધન્યાનામુત્તમં કિંસ્વિદ્ ધનાનાં સ્યાત્ કિમુત્તમમ્ ।
લાભાનામુત્તમં કિંસ્યાત્ સુખાનાં સ્યાત્કિમુત્તમમ્ ॥ ૭૩॥

યુધિષ્ઠિર ઉવાચ ।
ધન્યાનામુત્તમં દાક્ષ્યં ધનાનામુત્તમં શ્રુતમ્ ।
લાભાનાં શ્રેય આરોગ્યં સુખાનાં તુષ્ટિરુત્તમા ॥ ૭૪॥

યક્ષ ઉવાચ ।
કશ્ચ ધર્મઃ પરો લોકે કશ્ચ ધર્મઃ સદા ફલઃ ।
કિં નિયમ્ય ન શોચન્તિ કૈશ્ચ સન્ધિર્ન જીર્યતે ॥ ૭૫॥

યુધિષ્ઠિર ઉવાચ ।

આનૃશંસ્યં પરો ધર્મસ્ત્રયી ધર્મઃ સદા ફલઃ ।
મનો યમ્ય ન શોચન્તિ સન્ધિઃ સદ્ભિર્ન જીર્યતે ॥ ૭૬॥

યક્ષ ઉવાચ ।
કિં નુ હિત્વા પ્રિયો ભવતિ કિં નુ હિત્વા ન શોચતિ ।
કિં નુ હિત્વાઽર્થવાન્ભવતિ કિં નુ હિત્વા સુખી ભવેત્ ॥ ૭૭॥

યુધિષ્ઠિર ઉવાચ ।
માનં હિત્વા પ્રિયો ભવતિ ક્રોધં હિત્વા ન શોચતિ ।
કામં હિત્વાઽર્થવાન્ભવતિ લોભં હિત્વા સુખી ભવેત્ ॥ ૭૮॥

યક્ષ ઉવાચ ।
કિમર્થં બ્રાહ્મણે દાનં કિમર્થં નટનર્તકે ।
કિમર્થં ચૈવ ભૃત્યેષુ કિમર્થં ચૈવ રાજસુ ॥ ૭૯॥

યુધિષ્ઠિર ઉવાચ ।
ધર્માર્થં બ્રાહ્મણે દાનં યશોર્થં નટનર્તકે ।
ભૃત્યેષુ ભરણાર્થં વૈ ભયાર્થં ચૈવ રાજસુ ॥ ૮૦॥

યક્ષ ઉવાચ ।
કેન સ્વિદાવૃતો લોકઃ કેન સ્વિન્ન પ્રકાશતે ।
કેન ત્યજતિ મિત્રાણિ કેન સ્વર્ગં ન ગચ્છતિ ॥ ૮૧॥

યુધિષ્ઠિર ઉવાચ ।
અજ્ઞાનેનાવૃતો લોકસ્તમસા ન પ્રકાશતે ।
લોભાત્ત્યજતિ મિત્રાણિ સઙ્ગાત્ સ્વર્ગં ન ગચ્છતિ ॥ ૮૨॥

યક્ષ ઉવાચ ।
મૃતઃ કથં સ્યાત્પુરુષઃ કથં રાષ્ટ્રં મૃતં ભવેત્ ।
શ્રાદ્ધં મૃતં કથં વા સ્યાત્ કથં યજ્ઞો મૃતો ભવેત્ ॥ ૮૩॥

યુધિષ્ઠિર ઉવાચ ।
મૃતો દરિદ્રઃ પુરુષો મૃતં રાષ્ટ્રમરાજકમ્ ।
મૃતમશ્રોત્રિયં શ્રાદ્ધં મૃતો યજ્ઞસ્ત્વદક્ષિણઃ ॥ ૮૪॥

યક્ષ ઉવાચ ।
કા દિક્કિમુદકં પ્રોક્તં કિમન્નં કિંચ વૈ વિષમ્ ।
શ્રાદ્ધસ્ય કાલમાખ્યાહિ તતઃ પિબ હરસ્વ ચ ॥ ૮૫॥

યુધિષ્ઠિર ઉવાચ ।
સન્તો દિગ્જલમાકાશં ગૌરન્નં પ્રાર્થના વિષમ્ ।
શ્રાદ્ધસ્ય બ્રાહ્મણઃ કાલઃ કથં વા યક્ષ મન્યસે ॥ ૮૬॥

યક્ષ ઉવાચ ।
તપઃ કિંલક્ષણં પ્રોક્તં કો દમશ્ચ પ્રકીર્તિતઃ ।
ક્ષમા ચ કા પરા પ્રોક્તા કા ચ હ્રીઃ પરિકીર્તિતા ॥ ૮૭॥

યુધિષ્ઠિર ઉવાચ ।
તપઃ સ્વધર્મવર્તિત્વં મનસો દમનં દમઃ ।
ક્ષમા દ્વન્દ્વસહિષ્ણુત્વં હ્રીરકાર્યનિવર્તનમ્ ॥ ૮૮॥

યક્ષ ઉવાચ ।
કિં જ્ઞાનં પ્રોચ્યતે રાજન્કઃ શમશ્ચ પ્રકીર્તિતઃ ।
દયા ચ કા પરા પ્રોક્તા કિઞ્ચાર્જવમુદાહૃતમ્ ॥ ૮૯॥

યુધિષ્ઠિર ઉવાચ ।
જ્ઞાનં તત્ત્વાર્થસંબોધઃ શમશ્ચિત્તપ્રશાન્તતા ।
દયા સર્વસુખૈષિત્વમાર્જવં સમચિત્તતા ॥ ૯૦॥

યક્ષ ઉવાચ ।
કઃ શત્રુર્દુર્જયઃ પુંસાં કશ્ચ વ્યાદિરનન્તકઃ ।
કીદૃશશ્ચ સ્મૃતઃ સાધુરસાધુઃ કીદૃશઃ સ્મૃતઃ ॥ ૯૧॥

યુધિષ્ઠિર ઉવાચ ।
ક્રોધઃ સુદુર્જયઃ શત્રુર્લોભો વ્યાદિરનન્તકઃ ।
સર્વભૂતહિતઃ સાધુરસાદુર્નિર્દયઃ સ્મૃતઃ ॥ ૯૨॥

યક્ષ ઉવાચ ।
કો મોહઃ પ્રોચ્યતે રાજન્કશ્ચ માનઃ પ્રકીર્તિતઃ ।
કિમાલસ્યં ચ વિજ્ઞેયં કશ્ચ શોકઃ પ્રકીર્તિતઃ ॥ ૯૩॥

યુધિષ્ઠિર ઉવાચ ।
મોહો હિ ધર્મમૂઢત્વં માનસ્ત્વાત્માભિમાનિતા ।
ધર્મનિષ્ક્રિયતાઽઽલસ્યં શોકસ્ત્વજ્ઞાનમુચ્યતે ॥ ૯૪॥

યક્ષ ઉવાચ ।
કિં સ્થૈર્યમૃષિભિઃ પ્રોક્તં કિં ચ ધૈર્યમુદાહૃતમ્ ।

સ્નાનં ચ કિં પરં પ્રોક્તં દાનં ચ કિમિહોચ્યતે ॥ ૯૫॥

યુધિષ્ઠિર ઉવાચ ।
સ્વધર્મે સ્થિરતા સ્થૈર્યં ધૈર્યમિન્દ્રિયનિગ્રહઃ ।
સ્નાનં મનોમલત્યાગો દાનં વૈ ભૂતરક્ષણમ્ ॥ ૯૬॥

યક્ષ ઉવાચ ।
કઃ પણ્ડિતઃ પુમાન્જ્ઞેયો નાસ્તિકઃ કશ્ચ ઉચ્યતે ।
કો મૂર્ખઃ કશ્ચ કામઃ સ્યાત્ કો મત્સર ઇતિ સ્મૃતઃ ॥ ૯૭॥

યુધિષ્ઠિર ઉવાચ ।
ધર્મજ્ઞઃ પણ્ડિતો જ્ઞેયો નાસ્તિકો મૂર્ખ ઉચ્યતે ।
કામઃ સંસારહેતુશ્ચ હૃત્તાપો મત્સરઃ સ્મૃતઃ ॥ ૯૮॥

યક્ષ ઉવાચ ।
કોઽહઙ્કાર ઇતિ પ્રોક્તઃ કશ્ચ દંભઃ પ્રકીર્તિતઃ ।
કિં તદ્દૈવં પરં પ્રોક્તં કિં તત્પૈશુન્યમુચ્યતે ॥ ૯૯॥

યુધિષ્ઠિર ઉવાચ ।
મહાજ્ઞાનમહઙ્કારો દમ્ભો ધર્મો ધ્વજોચ્છ્રયઃ ।
દૈવં દાનફલં પ્રોક્તં પૈશુન્યં પરદૂષણમ્ ॥ ૧૦૦॥

યક્ષ ઉવાચ ।
ધર્મશ્ચાર્થશ્ચ કામશ્ચ પરસ્પરવિરોધિનઃ ।
એષાં નિત્યવિરુદ્ધાનાં કથમેકત્ર સઙ્ગમઃ ॥ ૧૦૧॥

યુધિષ્ઠિર ઉવાચ ।
યદા ધર્મશ્ચ ભાર્યા ચ પરસ્પરવશાનુગૌ ।
તદા ધર્માર્થકામાનાં ત્રયાણામપિ સઙ્ગમઃ ॥ ૧૦૨॥

યક્ષ ઉવાચ ।
અક્ષયો નરકઃ કેન પ્રાપ્યતે ભરતર્ષભ ।
એતન્મે પૃચ્છતઃ પ્રશ્નં તચ્છીઘ્રં વક્તુમર્હસિ ॥ ૧૦૩॥

યુધિષ્ઠિર ઉવાચ ।
બ્રાહ્મણં સ્વયમાહૂય યાચમાનમકિઞ્ચનમ્ ।
પશ્ચાન્નસ્તીતિ યો બ્રૂયાત્ સોઽક્ષયં નરકં વ્રજેત્ ॥ ૧૦૪॥

વેદેષુ ધર્મશાસ્ત્રેષુ મિથ્યા યો વૈ દ્વિજાતિષુ ।

દેવેષુ પિતૃધર્મેષુ સોઽક્ષયં નરકં વ્રજેત્ ॥ ૧૦૫॥

વિદ્યમાને ધને લોભાદ્દાનભોગવિવર્જિતઃ ।
પશ્ચાન્નાસ્તીતિ યો બ્રૂયાત્ સોઽક્ષયં નરકં વ્રજેત્ ॥ ૧૦૬॥

યક્ષ ઉવાચ ।
રાજન્કુલેન વૃત્તેન સ્વાધ્યાયેન શ્રુતેન વા ।
બ્રાહ્મણ્યં કેન ભવતિ પ્રબ્રૂહ્યેતત્ સુનિશ્ચિતમ્ ॥ ૧૦૭॥

યુધિષ્ઠિર ઉવાચ ।
શ્રૃણુ યક્ષ કુલં તાત ન સ્વાધ્યાયો ન ચ શ્રુતમ્ ।
કારણં હિ દ્વિજત્વે ચ વૃત્તમેવ ન સંશયઃ ॥ ૧૦૮॥

વૃત્તં યત્નેન સંરક્ષ્યં બ્રાહ્મણેન વિશેષતઃ ।
અક્ષીણવૃત્તો ન ક્ષીણો વૃત્તતસ્તુ હતો હતઃ ॥ ૧૦૯॥

પઠકાઃ પાઠકાશ્ચૈવ યે ચાન્યે શાસ્ત્રચિન્તકાઃ ।
સર્વે વ્યસનિનો મૂર્ખા યઃ ક્રિયાવાન્સ પણ્ડિતઃ ॥ ૧૧૦॥

ચતુર્વેદોઽપિ દુર્વૃત્તઃ સ શૂદ્રાદતિરિચ્યતે ।
યોઽગ્નિહોત્રપરો દાન્તઃ સ બ્રાહ્મણ ઇતિ સ્મૃતઃ ॥ ૧૧૧॥

યક્ષ ઉવાચ ।
પ્રિયવચનવાદી કિં લભતે
વિમૃશિતકાર્યકરઃ કિં લભતે ।
બહુમિત્રકરઃ કિં લભતે
ધર્મે રતઃ કિં લભતે કથય ॥ ૧૧૨॥

યુધિષ્ઠિર ઉવાચ ।
પ્રિયવચનવાદી પ્રિયો ભવતિ
વિમૃશિતકાર્યકરોઽધિકં જયતિ ।
બહુમિત્રકરઃ સુખં વસતે
યશ્ચ ધર્મરતઃ સ ગતિં લભતે ॥ ૧૧૩॥

યક્ષ ઉવાચ ।
કો મોદતે કિમાશ્ચર્યં કઃ પન્થાઃ કા ચ વાર્તિકા ।
વદ મે ચતુરઃ પ્રશ્નાન્મૃતા જીવન્તુ બાન્ધવાઃ ॥ ૧૧૪॥

યુધિષ્ઠિર ઉવાચ ।

પઞ્ચમેઽહનિ ષષ્ઠે વા શકં પચતિ સ્વે ગૃહે ।
અનૃણી ચાપ્રવાસી ચ સ વારિચર મોદતે ॥ ૧૧૫॥

અહન્યહનિ ભૂતાનિ ગચ્છન્તીહ યમાલયમ્ ।
શેષાઃ સ્થાવરમિચ્છન્તિ કિમાશ્ચર્યમતઃ પરમ્ ॥ ૧૧૬॥

તર્કોઽપ્રતિષ્ઠઃ શ્રુતયો વિભિન્ન
નૈકો ઋષિર્યસ્ય મતં પ્રમાણમ્ ।
ધર્મસ્ય તત્ત્વં નિહિતં ગુહાયાં
મહાજનો યેન ગતઃ સ પન્થાઃ ॥ ૧૧૭॥

અસ્મિન્મહામોહમયે કટાહે
સૂર્યાગ્નિના રાત્રિદિવેન્ધનેન ।
માસર્તુદર્વીપરિઘટ્ટનેન
ભૂતાનિ કાલઃ પચતીતિ વાર્તા ॥ ૧૧૮॥

યક્ષ ઉવાચ ।
વ્યાખ્યાતા મે ત્વયા પ્રશ્ના યાથાતથ્યં પરન્તપ ।
પુરુષં ત્વિદાનીં વ્યાખ્યાહિ યશ્ચ સર્વધની નરઃ ॥ ૧૧૯॥

યુધિષ્ઠિર ઉવાચ ।
દિવં સ્પૃશતિ ભૂમિં ચ શબ્દઃ પુણ્યેન કર્મણા ।
યાવત્સ શબ્દો ભવતિ તાવત્પુરુષ ઉચ્યતે ॥ ૧૨૦॥

તુલ્યે પ્રિયાપ્રિયે યસ્ય સુખદુઃખે તથૈવ ચ ।
અતીતાનાગતે ચોભે સ વૈ સર્વધની નરઃ ॥ ૧૨૧॥

યક્ષ ઉવાચ ।
વ્યાખ્યાતઃ પુરુષો રાજન્યશ્ચ સર્વધની નરઃ ।
તસ્માત્ત્વમેકં ભ્રાતૄણાં યમિચ્છસિ સ જીવતુ ॥ ૧૨૨॥

યુધિષ્ઠિર ઉવાચ ।
શ્યામો ય એષ રક્તાક્ષો બૃહચ્છાલ ઇવોત્થિતઃ ।
વ્યૂઢોરસ્કો મહાબાહુર્નકુલો યક્ષ જીવતુ ॥ ૧૨૩॥

યક્ષ ઉવાચ ।
પ્રિયસ્તે ભીમસેનોઽયમર્જુનો વઃ પરાયણમ્ ।
સ કસ્માન્નકુલો રાજન્સાપત્નં જીવમિચ્છસિ ॥ ૧૨૪॥

યસ્ય નાગસહસ્રેણ દશસઙ્ખ્યેન વૈ બલમ્ ।
તુલ્યં તં ભીમમુત્સૃજ્ય નકુલં જીવમિચ્છસિ ॥ ૧૨૫॥

તથૈનં મનુજાઃ પ્રાહુર્ભીમસેનં પ્રિયં તવ ।
અથ કેનાનુભાવેન સાપત્નં જીવમિચ્છસિ ॥ ૧૨૬॥

યસ્ય બાહુબલં સર્વે પાણ્ડવાઃ સમુપાસતે ।
અર્જુનં તમપાહાય નકુલં જીવમિચ્છસિ ॥ ૧૨૭॥

યુધિષ્ઠિર ઉવાચ ।
ધર્મ એવ હતો હન્તિ ધર્મો રક્ષતિ રક્ષિતઃ ।
તસ્માદ્ધર્મં ન ત્યજામિ મા નો ધર્મો હતોઽવધીત્ ॥ ૧૨૮॥

આનૃશંસ્યં પરો ધર્મઃ પરમાર્થાચ્ચ મે મતમ્ ।
આનૃશંસ્યં ચિકીર્ષામિ નકુલો યક્ષ જીવતુ ॥ ૧૨૯॥

ધર્મશીલઃ સદા રાજા ઇતિ માં માનવા વિદુઃ ।
સ્વધર્માન્ન ચલિષ્યામિ નકુલો યક્ષ જીવતુ ॥ ૧૩૦॥

કુન્તી ચૈવ માદ્રી ચ દ્વે ભાર્યે તુ પિતુર્મમ ।
ઉભે સપુત્રે સ્યાતાં વૈ ઇતિ મે ધીયતે મતિઃ ॥ ૧૩૧॥

યથા કુન્તી તથા માદ્રી વિશેષો નાસ્તિ મે તયોઃ ।
માતૃભ્યાં સમમિચ્છામિ નકુલો યક્ષ જીવતુ ॥ ૧૩૨॥

યક્ષ ઉવાચ ।
તસ્ય તેઽર્થાચ્ચ કામાચ્ચ આનૃશંસ્યં પરં મતમ્ ।
તસ્માત્તે ભ્રાતરઃ સર્વે જીવન્તુ ભરતર્ષભ ॥ ૧૩૩॥

ઇતિ શ્રીમહાભારતે આરણ્યકે પર્વણિ આરણેયપર્વણિ યક્ષપ્રશ્ને
ત્રયોદશાધિકત્રિશતતમોઽધ્યયઃ ॥

॥ ઇતિ॥

These verses form Ch. 297 of Prof. Tokunaga's files,
and Ch. 313 of Pt. Kinjavadekar's edition.

Following verses do not appear in the former:
4-20; 34; 66-67; 79-82;86-118; 128; 131 .

Encoded by Sunder Hattangadi

Proofread by Sunder Hattangadi, Priyamvada Nambrath

*YakSha's Questions Yaxaprashna*

pdf was typeset on March 24, 2024

Please send corrections to *sanskrit@cheerful.com*